# Shri Vivekanandaprabhatapranjalih

# શ્રીવિવેકાનન્દપ્રભાતપ્રાઞ્જલિઃ

## Document Information

Text title : Shri Vivekanandaprabhatapranjalih

File name : vivekAnandaprabhAtaprAnjaliH.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Swami Harshananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# Shri Vivekanandaprabhatapranjalih

# શ્રીવિવેકાનન્દપ્રભાતપ્રાઞ્જલિઃ

સમાધિસ્થઃ શિવઃ સ્વલોકે નિર્ભરં
    જનાનાં ક્રન્દનાદ્ ભવાગ્નૌ ભીષણે ।
પ્રદગ્ધાનાં પ્રબોધિતસ્ત્વં હ્યાગતઃ
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૧॥

નરેન્દ્રઃ શૈશવે નરેન્દ્રો યૌવને
    નરેન્દ્રઃ ક્રીડ઼ને નરેન્દ્રઃ શિક્ષણે ।
નરેન્દ્રઃ પાલને નરેન્દ્રાહ્યર્પણે
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૨॥

હરીન્દ્રશ્ચેષ્ટિતૈઃ કલાજ્ઞો ગાયનૈઃ
    પરિજ્ઞાનૈર્બુધો મહર્ષિર્દર્શનૈઃ ।
યતીન્દ્રોઽસક્તિભિર્ભવાન્ યન્નાસ્તિ કિં
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૩॥

મુમુક્ષાદર્શિતાઽભિહંસં ધાવનૈઃ
    વિનૈકાં પાદુકાં નિતાન્તોન્મત્તવત્ ।
સમાનાં દેહિ મે મુમુક્ષાં મદ્ગુરો
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૪॥

ગુરોરઙ્ઘ્ર્યુત્પલે સ્વમાત્માનઃ દદૌ
    પરીક્ષ્યાનન્તરં બહુપ્રશ્નૈર્ભૃશમ્ ।
વિશુદ્ધૈઃ સેવનૈર્ભવાંસ્ત્વં પિપ્રિયે
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૫॥

સુગન્ધઃ શ્રી ગુરુર્ભવાન્વાયુઃ ખલુ
    સ તૂર્યં ત્વં ચ ભો મહોચ્ચૈર્ઘોષકઃ ।
ગુરુસ્સૂર્યસ્તુ હે કિલાદર્શો ભવાન્
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૬॥

સ્વધર્મશ્રેષ્ઠતાં સગર્વં શંસતાં
    જનાનાં ધૃષ્ટતા ત્વયૈવાભાજ્યહો ।
સ્વધર્મો વૈદિકો હ્યનર્ઘો દર્શિતઃ
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૭॥

સ્ફુલિઙ્ગાન્ સ્ફોટયન્ સુદીપ્તાગ્નિર્યથા
    તથૈવ ત્વં યતે વિકીર્યામાનુષીમ્ ।
પરિજ્ઞાનપ્રભામચારીર્ભારતે
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૮॥

અહો આકર્ષણં તવાસ્યાસ્યાતુલં
    તવાહો પૌરુષં વિરાગો મુગ્ધતા ।
પ્રગાઢં પ્રેમ ચ હ્યગાધં વેદનં
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૯॥

વિમોક્ષં સ્વાત્મનશ્ચતુર્યોગાધ્વભિઃ
    પૃથગ્વા સંહતૈર્હિતં લોકસ્ય ચ ।
તવાજ્ઞા સાધયેદિતિ પ્રીત્યા નરઃ
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૧૦॥

યતેઽનુરૂસ્તવ પ્રણામં દાસ્યતિ
    પ્રફુલ્લં ષટ્પદૈઃ પ્રસૂનં પ્રાવૃતમ્ ।
તવાર્થં કોકિલો મનોજ્ઞં કૂજતિ
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૧૧॥

ઉષઃ કાલે પદે નમસ્કૃત્યાશિષા
    લભેરન્ ધન્યતામિતિ શ્રદ્ધાલવઃ ।
સમેતા સમ્મુખે દદેથા દર્શનં
    વિવેકાનન્દ તે પ્રભાતે પ્રાઞ્જલિઃ ॥ ૧૨॥

હિમાદ્રેરાશ્રમે જયન્ત્યાં નિર્મિતઃ
    ભુજઙ્ગસ્રગ્વિણીતિ વૃતે નૂતને ।
સ્તવોઽયં યઃ પઠેત્ સભક્ત્યા તં નરઃ
    સ શક્તિં પૌરુષં વિરાગં ચાર્જતિ ॥ ૧૩॥

ઇતિ સ્વામિહર્ષાનન્દવિરચિતઃ “શ્રીવિવેકાનન્દપ્રભાતપ્રાઞ્જલિઃ” સમાપ્તઃ ।

Proofread by Aruna Narayanan

*Shri Vivekanandaprabhatapranjalih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*